॥ वाल्मीकि रामायण ॥

६ युद्धकाण्ड

अध्याय ५७

एवं विलपमानस्य रावणस्य दुरात्मनः ।
श्रुत्वा शोकाभितप्तस्य त्रिशिरा वाक्यमब्रवीत् ॥ १ ॥

एवमेव महावीर्यो हतो नस्तात मध्यमः ।
न तु सत्पुरुषा राजन्विलपन्ति यथा भवान् ॥ २ ॥

नूनं त्रिभुवणस्यापि पर्याप्तस्त्वमसि प्रभो ।
स कस्मात्प्राकृत इव शोकस्यात्मानमीदृशम् ॥ ३ ॥

ब्रह्मदत्तास्ति ते शक्तिः कवचः सायको धनुः ।
सहस्रखरसंयुक्तो रथो मेघसमस्वनः ॥ ४ ॥

त्वयासकृद्विशस्त्रेण विशस्ता देवदानवाः ।
स सर्वायुधसम्पन्नो राघवं शास्तुमर्हसि ॥ ५ ॥

कामं तिष्ठ महाराजनिर्गमिष्याम्यहं रणम् ।
उद्धरिष्यामि ते शत्रून्गारुडः पन्नगानिह ॥ ६ ॥

शम्बरो देवराजेन नरको विष्णुना यथा ।
तथाद्य शयिता रामो मया युधि निपातितः ॥ ७ ॥

श्रुत्वा त्रिशिरसो वाक्यं रावणो राक्षसाधिपः ।
पुनर्जातमिवात्मानं मन्यते कालचोदितः ॥ ८ ॥

श्रुत्वा त्रिशिरसो वाक्यं देवान्तकनरान्तकौ ।
अतिकायश्च तेजस्वी बभूवुर्युद्धहर्षिताः ॥ ९ ॥

ततोऽहमहमित्येवं गर्जन्तो नैरृतर्षभाः ।
रावणस्य सुता वीराः शक्रतुल्यपराक्रमाः ॥ १० ॥

अन्तरिक्षचराः सर्वे सर्वे माया विशारदाः ।
सर्वे त्रिदशदर्पघ्नाः सर्वे च रणदुर्मदाः ॥ ११ ॥

सर्वेऽस्त्रबलसम्पन्नाः सर्वे विस्तीर्ण कीर्तयः ।
सर्वे समरमासाद्य न श्रूयन्ते स्म निर्जिताः ॥ १२ ॥

सर्वेऽस्त्रविदुषो वीराः सर्वे युद्धविशारदाः ।
सर्वे प्रवरजिज्ञानाः सर्वे लब्धवरास्तथा ॥ १३ ॥

स तैस्तथा भास्करतुल्यवर्चसैः
सुतैर्वृतः शत्रुबलप्रमर्दनैः ।
रराज राजा मघवान्यथामरैर्
वृतो महादानवदर्पनाशनैः ॥ १४ ॥

स पुत्रान्सम्परिष्वज्य भूषयित्वा च भूषणैः ।
आशीर्भिश्च प्रशस्ताभिः प्रेषयामास संयुगे ॥ १५ ॥

महोदरमहापार्श्वौ भ्रातरौ चापि रावणः ।
रक्षणार्थं कुमाराणां प्रेषयामास संयुगे ॥ १६ ॥

तेऽभिवाद्य महात्मानं रावणं रिपुरावणम् ।
कृत्वा प्रदक्षिणं चैव महाकायाः प्रतस्थिरे ॥ १७ ॥

सर्वौषधीभिर्गन्धैश्च समालभ्य महाबलाः ।
निर्जग्मुर्नैरृतश्रेष्ठाः षडेते युद्धकाङ्क्षिणः ॥ १८ ॥

ततः सुदर्शनं नाम नीलजीमूतसंनिभम् ।
ऐरावतकुले जातमारुरोह महोदरः ॥ १९ ॥

सर्वायुधसमायुक्तं तूणीभिश्च स्वलङ्कृतम् ।
रराज गजमास्थाय सवितेवास्तमूर्धनि ॥ २० ॥

हयोत्तमसमायुक्तं सर्वायुधसमाकुलम् ।
आरुरोह रथश्रेष्ठं त्रिशिरा रावणात्मजः ॥ २१ ॥

त्रिशिरा रथमास्थाय विरराज धनुर्धरः ।
सविद्युदुल्कः सज्वालः सेन्द्रचाप इवाम्बुदः ॥ २२ ॥

त्रिभिः किरीटैस्त्रिशिराः शुशुभे स रथोत्तमे ।
हिमवानिव शैलेन्द्रस्त्रिभिः काञ्चनपर्वतैः ॥ २३ ॥

अतिकायोऽपि तेजस्वी राक्षसेन्द्रसुतस्तदा ।
आरुरोह रथश्रेष्ठं श्रेष्ठः सर्वधनुष्मताम् ॥ २४ ॥

सुचक्राक्षं सुसंयुक्तं सानुकर्षं सकूबरम् ।

तूणीबाणासनैर्दीप्तं प्रासासि परिघाकुलम् ॥ २५॥

स काञ्चनविचित्रेण किरीटेन विराजता ।
भूषणैश्च बभौ मेरुः प्रभाभिरिव भास्वरः ॥ २६॥

स रराज रथे तस्मिन्राजसूनुर्महाबलः ।
वृतो नैरृतशार्दूलैर्वज्रपाणिरिवामरैः ॥ २७॥

हयमुच्चैःश्रवः प्रख्यं श्वेतं कनकभूषणम् ।
मनोजवं महाकायमारुरोह नरान्तकः ॥ २८॥

गृहीत्वा प्रासमुल्काभं विरराज नरान्तकः ।
शक्तिमादाय तेजस्वी गुहः शत्रुष्विवाहवे ॥ २९॥

देवान्तकः समादाय परिघं वज्रभूषणम् ।
परिगृह्य गिरिं दोर्भ्यां वपुर्विष्णोर्विडम्बयन् ॥ ३०॥

महापार्श्वो महातेजा गदामादाय वीर्यवान् ।
विरराज गदापाणिः कुबेर इव संयुगे ॥ ३१॥

ते प्रतस्थुर्महात्मानो बलैरप्रतिमैर्वृताः ।
सुरा इवामरावत्यां बलैरप्रतिमैर्वृताः ॥ ३२॥

तान्गजैश्च तुरङ्गैश्च रथैश्चाम्बुदनिस्वनैः ।
अनुजग्मुर्महात्मानो राक्षसाः प्रवरायुधाः ॥ ३३॥

ते विरेजुर्महात्मानो कुमाराः सूर्यवर्चसः ।
किरीटिनः श्रिया जुष्टा ग्रहा दीप्ता इवाम्बरे ॥ ३४॥

प्रगृहीता बभौ तेषां छत्राणामावलिः सिता ।
शारदाभ्रप्रतीकाशा हंसावलिरिवाम्बरे ॥ ३५॥

मरणं वापि निश्चित्य शत्रूणां वा पराजयम् ।
इति कृत्वा मतिं वीरा निर्जग्मुः संयुगार्थिनः ॥ ३६॥

जगर्जुश्च प्रणेदुश्च चिक्षिपुश्चापि सायकान् ।
जहृषुश्च महात्मानो निर्यान्तो युद्धदुर्मदाः ॥ ३७॥

क्ष्वेडितास्फोटनिनदैः सञ्चचालेव मेदिनी ।
रक्षसां सिंहनादैश्च पुस्फोटेव तदाम्बरम् ॥ ३८॥

तेऽभिनिष्क्रम्य मुदिता राक्षसेन्द्रा महाबलाः ।
ददृशुर्वानरानीकं समुद्यतशिलानगम् ॥ ३९॥

हरयोऽपि महात्मानो ददृशुर्नैरृतं बलम् ।
हस्त्यश्वरथसम्बाधं किङ्किणीशतनादितम् ॥ ४०॥

नीलजीमूतसङ्काशं समुद्यतमहायुधम् ।
दीप्तानलरविप्रख्यैर्नैरृतैः सर्वतो वृतम् ॥ ४१॥

तद्दृष्ट्वा बलमायान्तं लब्धलक्ष्याः प्लवङ्गमाः ।
समुद्यतमहाशैलाः सम्प्रणेदुर्मुहुर्मुहुः ॥ ४२॥

ततः समुद्घुष्टरवं निशम्य
रक्षोगणा वानरयूथपानाम् ।
अमृष्यमाणाः परहर्षमुग्रं
महाबला भीमतरं विनेदुः ॥ ४३॥

ते राक्षसबलं घोरं प्रविश्य हरियूथपाः ।
विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा ॥ ४४॥

के चिदाकाशमाविश्य के चिदुर्व्यां प्लवङ्गमाः ।
रक्षःसैन्येषु सङ्क्रुद्धाश्चेरुर्द्रुमशिलायुधाः ॥ ४५॥

ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनुत्तमाम् ।
बाणौघैर्वार्यमाणाश्च हरयो भीमविक्रमाः ॥ ४६॥

सिंहनादान्विनेदुश्च रणे राक्षसवानराः ।
शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवङ्गमाः ॥ ४७॥

निजघ्नुः संयुगे क्रुद्धाः कवचाभरणावृतान् ।
के चिद्रथगतान्वीरान्गजवाजिगतानपि ॥ ४८॥

निजघ्नुः सहसाप्लुत्य यातुधानान्प्लवङ्गमाः ।
शैलशृङ्गनिपातैश्च मुष्टिभिर्वान्तलोचनाः ।
चेलुः पेतुश्च नेदुश्च तत्र राक्षसपुङ्गवाः ॥ ४९॥

ततः शैलैश्च खड्गैश्च विसृष्टैर्हरिराक्षसैः ।
मुहूर्तेनावृता भूमिरभवच्छोणिताप्लुता ॥ ५०॥

विकीर्णपर्वताकारै रक्षोभिररिमर्दनैः ।
आक्षिप्ताः क्षिप्यमाणाश्च भग्नशूलाश्च वानरैः ॥ ५१॥

वानरान्वानरैरेव जग्नुस्ते रजनीचराः ।
राक्षसान्राक्षसैरेव जघ्नुस्ते वानरा अपि ॥ ५२॥

आक्षिप्य च शिलास्तेषां निजघ्नू राक्षसा हरीन् ।
तेषां चाच्छिद्य शस्त्राणि जघ्नू रक्षांसि वानराः ॥ ५३॥

निजघ्नुः शैलशूलास्त्रैर्विभिदुश् च परस्परम् ।

सिंहनादान्विनेदुश्च रणे वानरराक्षसाः ॥ ५४॥

छिन्नवर्मतनुत्राणा राक्षसा वानरैर्हताः ।
रुधिरं प्रस्रुतास्तत्र रससारमिव द्रुमाः ॥ ५५॥

रथेन च रथं चापि वारणेन च वारणम् ।
हयेन च हयं के चिन्निजघ्नुर्वानरा रणे ॥ ५६॥

क्षुरप्रैरर्धचन्द्रैश्च भल्लैश्च निशितैः शरैः ।
राक्षसा वानरेन्द्राणां चिच्छिदुः पादपाञ्शिलाः ॥ ५७॥

विकीर्णैः पर्वताग्रैश्च द्रुमैश्छिन्नैश्च संयुगे ।
हतैश्च कपिरक्षोभिर्दुर्गमा वसुधाभवत् ॥ ५८॥

तस्मिन्प्रवृत्ते तुमुले विमर्दे
प्रहृष्यमाणेषु वली मुखेषु ।
निपात्यमानेषु च राक्षसेषु
महर्षयो देवगणाश्च नेदुः ॥ ५९॥

ततो हयं मारुततुल्यवेगम्
आरुह्य शक्तिं निशितां प्रगृह्य ।
नरान्तको वानरराजसैन्यं
महार्णवं मीन इवाविवेश ॥ ६०॥

स वानरान्सप्तशतानि वीरः
प्रासेन दीप्तेन विनिर्बिभेद ।
एकः क्षणेनेन्द्ररिपुर्महात्मा
जघान सैन्यं हरिपुङ्गवानाम् ॥ ६१॥

ददृशुश्च महात्मानं हयपृष्ठे प्रतिष्ठितम् ।
चरन्तं हरिसैन्येषु विद्याधरमहर्षयः ॥ ६२॥

स तस्य ददृशे मार्गो मांसशोणितकर्दमः ।
पतितैः पर्वताकारैर्वानरैरभिसंवृतः ॥ ६३॥

यावद्विक्रमितुं बुद्धिं चक्रुः प्लवगपुङ्गवाः ।
तावदेतानतिक्रम्य निर्बिभेद नरान्तकः ॥ ६४॥

ज्वलन्तं प्रासमुद्यम्य सङ्ग्रामान्ते नरान्तकः ।
ददाह हरिसैन्यानि वनानीव विभावसुः ॥ ६५॥

यावदुत्पाटयामासुर्वृक्षाञ्शैलान्वनौकसः ।
तावत्प्रासहताः पेतुर्वज्रकृत्ता इवाचलाः ॥ ६६॥

दिक्षु सर्वासु बलवान्विचचार नरान्तकः ।
प्रमृद्नन्सर्वतो युद्धे प्रावृट्काले यथानिलः ॥ ६७॥

न शेकुर्धावितुं वीरा न स्थातुं स्पन्दितुं कुतः ।
उत्पतन्तं स्थितं यान्तं सर्वान्विव्याध वीर्यवान् ॥ ६८॥

एकेनान्तककल्पेन प्रासेनादित्यतेजसा ।
भिन्नानि हरिसैन्यानि निपेतुर्धरणीतले ॥ ६९॥

वज्रनिष्पेषसदृशं प्रासस्याभिनिपातनम् ।
न शेकुर्वानराः सोढुं ते विनेदुर्महास्वनम् ॥ ७०॥

पततां हरिवीराणां रूपाणि प्रचकाशिरे ।
वज्रभिन्नाग्रकूटानां शैलानां पतताम् इव ॥ ७१॥

ये तु पूर्वं महात्मानः कुम्भकर्णेन पातिताः ।
तेऽस्वस्था वानरश्रेष्ठाः सुग्रीवमुपतस्थिरे ॥ ७२॥

विप्रेक्षमाणः सुग्रीवो ददर्श हरिवाहिनीम् ।
नरान्तकभयत्रस्तां विद्रवन्तीमितस्ततः ॥ ७३॥

विद्रुतां वाहिनीं दृष्ट्वा स ददर्श नरान्तकम् ।
गृहीतप्रासमायान्तं हयपृष्ठे प्रतिष्ठितम् ॥ ७४॥

अथोवाच महातेजाः सुग्रीवो वानराधिपः ।
कुमारमङ्गदं वीरं शक्रतुल्यपराक्रमम् ॥ ७५॥

गच्छैनं राक्षसं वीर योऽसौ तुरगमास्थितः ।
क्षोभयन्तं हरिबलं क्षिप्रं प्राणैर्वियोजय ॥ ७६॥

स भर्तुर्वचनं श्रुत्वा निष्पपाताङ्गदस्तदा ।
अनीकान्मेघसङ्काशान्मेघानीकादिवांशुमान् ॥ ७७॥

शैलसङ्घातसङ्काशो हरीणामुत्तमोऽङ्गदः ।
रराजाङ्गदसंनद्धः सधातुरिव पर्वतः ॥ ७८॥

निरायुधो महातेजाः केवलं नखदंष्ट्रवान् ।
नरान्तकमभिक्रम्य वालिपुत्रोऽब्रवीद्वचः ॥ ७९॥

तिष्ठ किं प्राकृतैरेभिर्हरिभिस्त्वं करिष्यसि ।
अस्मिन्वज्रसमस्पर्शे प्रासं क्षिप ममोरसि ॥ ८०॥

अङ्गदस्य वचः श्रुत्वा प्रचुक्रोध नरान्तकः ।
सन्दश्य दशनैरोष्ठं निश्वस्य च भुजङ्गवत् ॥ ८१॥

स प्रासमाविध्य तदाङ्गदाय
समुज्ज्वलन्तं सहसोत्ससर्ज ।

स वालिपुत्रोरसि वज्रकल्पे
बभूव भग्नो न्यपतच्च भूमौ ॥ ८२॥

तं प्रासमालोक्य तदा विभग्नं
सुपर्णकृत्तोरगभोगकल्पम् ।
तलं समुद्यम्य स वालिपुत्रस्
तुरङ्गमस्याभिजघान मूर्ध्नि ॥ ८३॥

निमग्नपादः स्फुटिताक्षि तारो
निष्क्रान्तजिह्वोऽचलसंनिकाशः ।
स तस्य वाजी निपपात भूमौ
तलप्रहारेण विकीर्णमूर्धा ॥ ८४॥

नरान्तकः क्रोधवशं जगाम
हतं तुरगं पतितं निरीक्ष्य ।
स मुष्टिमुद्यम्य महाप्रभावो
जघान शीर्षे युधि वालिपुत्रम् ॥ ८५॥

अथाङ्गदो मुष्टिविभिन्नमूर्धा
सुस्राव तीव्रं रुधिरं भृशोष्णम् ।
मुहुर्विजज्वाल मुमोह चापि
संज्ञां समासाद्य विसिष्मिये च ॥ ८६॥

अथाङ्गदो वज्रसमानवेगं
संवर्त्य मुष्टिं गिरिशृङ्गकल्पम् ।
निपातयामास तदा महात्मा
नरान्तकस्योरसि वालिपुत्रः ॥ ८७॥

स मुष्टिनिष्पिष्टविभिन्नवक्षा
ज्वालां वमञ्शोणितदिग्धगात्रः ।
नरान्तको भूमितले पपात
यथाचलो वज्रनिपातभग्नः ॥ ८८॥

अथान्तरिक्षे त्रिदशोत्तमानां
वनौकसां चैव महाप्रणादः ।
बभूव तस्मिन्निहतेऽग्र्यवीरे
नरान्तके वालिसुतेन सङ्ख्ये ॥ ८९॥

अथाङ्गदो राममनः प्रहर्षणं
सुदुष्करं तं कृतवान्हि विक्रमम् ।
विसिष्मिये सोऽप्यतिवीर्य विक्रमः
पुनश्च युद्धे स बभूव हर्षितः ॥ ९०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com